শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রীৱিষ্ণুপুরাণে মুচুকুন্দ কৃত
# ॥শ্রীভগৱতস্স্তুতিঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते रामानुजाय नमः

# ॥श्रीभगवतस्तुतिः ॥

সংসারপতিতস্যৈকো জন্তোস্ত্বং শরণং পরম্।
প্রসীদ ত্বং প্রপন্নার্তিহর নাশয মেঽশুভম্॥ ১ ॥

ত্বং পযোনিধযশ্শৈলসরিতস্ত্বং ৱনানি চ।
মেদিনী গগনং ৱাযুরাপোঽগ্নিস্ত্বং তথা মনঃ॥ ২ ॥

বুদ্ধিরৱ্যাকৃতপ্রাণাঃ প্রাণেশস্ত্বং তথা পুমান্।
পুংসঃ পরতরং যচ্চ ৱ্যাপ্যজন্মৱিকারৱত্॥ ৩ ॥

শব্দাদিহীনমজরমমেযং ক্ষযৱর্জিতম্।
অৱৃদ্ধিনাশং তদ্ব্রহ্ম ত্বমাদ্যন্তৱিৱর্জিতম্॥ ৪ ॥

ত্বত্তোঽমরাসসপিতরো যক্ষগন্ধর্ৱকিন্নরাঃ।
সিদ্ধাশ্চাপ্সরসস্ত্বত্তো মনুষ্যাঃ পশৱঃ খগাঃ॥ ৫ ॥

সরীসৃপা মৃগাসসর্ৱে ত্বত্তসসর্ৱে মহীরুহাঃ।
যচ্চ ভূতং ভৱিষ্যং চ কিঞ্চিদত্র চরাচরম্॥ ৬ ॥

মূর্তামূর্তং তথা চাপি স্থূলং সূক্ষ্মতরং তথা।
তত্সর্ৱং ত্বং জগত্কর্তা নাস্তি কিঞ্চিত্ত্বযা ৱিনা॥ ৭ ॥

মযা সংসারচক্রেঽস্মিন্ভ্রমতা ভগৱন্ সদা।
তাপত্রযাভিভূতেন ন প্রাপ্তা নির্ৱৃতিঃ ক্বচিত্॥ ৮ ॥

দুঃখান্যেৱ সুখানীতি মৃগতৃষ্ণা জলাশযা।
মযা নাথ গৃহীতানি তানি তাপায মেঽভৱন্॥ ৯ ॥

রাজ্যমুর্ৱী বলং কোশো মিত্রপক্ষস্তথাত্মজাঃ।
ভার্যা ভৃত্যজনো যে চ শব্দাদ্যা ৱিষযাঃ প্রভো॥ ১০ ॥

সুখবুদধ্যা মযা সর্ৱং গৃহীতমিদমৱ্যযম্।
পরিণামে তদেৱেশ তাপাত্মকভূন্মম॥ ১১ ॥

www.prapatti.com

দেৱলোকগতিং প্রাপ্তো নাথ দেৱগণোপি হি।
মত্তসসাহায্যকামোভূচ্ছাশ্বতী কুত্র নির্ৱৃতিঃ॥ ১২ ॥

ত্বামনারাধ্য জগতাং সর্ৱেষাং প্রভৱাস্পদম্।
শাশ্বতী প্রাপ্যতে কেন পরমেশ্বর নির্ৱৃতিঃ॥ ১৩ ॥

ত্বন্মাযামূঢমনসো জন্মমৃত্যুজরাদিকান্।
অৱাপ্য তাপানপশ্যন্তি প্রেতরাজমনন্তরম্॥ ১৪ ॥

ততো নিজক্রিযাসূতি নরকেষৱতিদারুণম্।
প্রাপ্নুৱন্তি নরা দুঃখমস্বরূপৱিদস্তৱ॥ ১৫ ॥

অহমত্যন্তৱিষযী মোহিতস্তৱ মাযযা।
মমত্বগর্ৱগর্ত্তান্তর্ভ্রমামি পরমেশ্বর॥ ১৬ ॥

সোহং ত্বাং শরণমপারমপ্রমেযং
 সম্প্রাপ্তঃ পরমপদং যতো ন কিঞ্চিত্।
সংসারভ্রমপরিতাপতপ্তচেতা
 নির্ৱাণে পরিণতধাম্নি সাভিলাষঃ॥ ১৭ ॥

॥ ইতি শ্রীভগৱতস্তুতিঃ সমাপ্তঃ ॥

www.prapatti.com